जेता[A]-त्री, जापयिता-त्री, जिगीषिता-त्री, जेजीयिता-त्री ;

[B]जयन्-न्ती, जापयन्-न्ती, जिगीषन्-न्ती ; —

जेष्यन्-न्ती-ती, जापयिष्यन्-न्ती-ती, जिगीषिष्यन्-न्ती-ती ; —

[1]विजयमानः-[C]पराजयमानः, [2]जापयमानः, विजिगीषमाणः[3], पराजिगीषमाणः, जेजीयमानः ;

विजेष्यमाणः-पराजेष्यमाणः, जापयिष्यमाणः, वि[परा]जिगीषिष्यमाणः, जेजीयिष्यमाणः ;

[4]इन्द्रजित्[D], प्रजित्, अभिजित्, शत्रुजित्-जिद्-जितौ-जितः ;

जितम्-तः-जितवान्[E], जापितः, जिगीषितः, जेजीयितः-तवान् ;

जयः, [5]जित्वरः,[F] [6]जित्वा-जित्वानौ-जित्वानः, कंसजित्वा, जित्वरी,

---

1. 'विपराभ्यां जेः' (1-3-19) इति शानच्।

2. धातोरकर्मकत्वे 'अणावकर्मकात् चित्तवत्कर्तृकात्' (1-3-88) इति ण्यन्तात् परस्मैपदमेव। सकर्मकत्वे तु ण्यन्ताच्छानजपि भवतीति ज्ञेयम्।

3. 'पूर्ववत् सनः' (1-3-62) इति विपरापूर्वकत्वे सन्नन्तात् शानच्।

4. 'सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्' (3-2-61) इति उपसर्गे, अनुपसर्गे वा उपपदे क्विप्।

5. 'इण्नशिजिसर्तिभ्यः क्वरप्' (3-2-163) इति तच्छीलादिषु कर्तृषु क्वरप्। 'ह्रस्वस्य पिति—' (6-1-71) इति तुक्।

6. 'अन्येभ्योऽपि दृश्यन्ते' (3-2-75) इति क्वनिपि तुक्। कंसं जयति, जितवान् वा कंसजित्वा। स्त्रियां 'वनो र च' (4-1-7) इति ङीप् रेफश्च।

A. 'जेता यज्ञद्रुहां संख्ये धर्मसन्तानसूर्वने।' भ. का. 4-27.

B. 'सञ्चारनिष्ठ्यूतनखेन्दुचन्द्रिकं लोके जयन्तं सकलैकजीवनम्।' धा. का 1. 72.

C. 'खं पराजयमानोऽसावुत्पत्य पवनात्मजम्।' भ. का. 8. 9.

D. 'इन्द्रजित्सूर्विनाशाय मारुतेः क्रोधमूर्च्छितः॥' भ. का. 9.3.

E. 'यातयामं विजितवान् स रामं यदि किं ततः॥' भ. का. 5-39.

F. 'हस्तेकरिष्यति जगत्त्रयजित्वरोऽपि कस्तादृशीं दुहितरं जनकेश्वरस्य।' अनर्घराघवे 3.8.